अध्यायः 7

# नूतनाः प्रश्नाः, नूतनाः विचाराः

अनघा भ्रमणार्थं गतवती

अनघा अद्य प्रथमवारं स्वविद्यालयस्य पक्षतः भ्रमणार्थं गच्छन्ती आसीत् । एतदर्थं सा चिररात्रौ पुणेतः (महाराष्ट्रतः) वाराणसीं प्रति गच्छत् रेलयानम् आरोहत् । अनघां रेलस्थानके प्रापयितुं तस्याः अम्बा आगच्छत् । सा तत्र अध्यापिकाम् अवदत् । "छात्रान् बुद्धस्य विषये बोधनेन सह सारनाथं दर्शयितुम् अपि नयतु ।



## बुद्धस्य कथा

सिद्धार्थः बौद्ध-धर्मस्य संस्थापकः आसीत् सः गौतमनाम्ना अपि ज्ञायते। तस्य जन्म प्रायः २५००वर्षेभ्यः पूर्वम् अभवत् । अयं तादृशः कालः आसीत् यदा जनानां जीवनशैली द्रुतगत्या परिवर्तमाना आसीत् । यथा भवती षष्ठाध्याये अपठत् यत् एतस्मिन् काले महाजनपदानां केचन राजानः बहुशक्तिशालिनः अभवन् । सहस्रं वर्षाणां पश्चात् पुनः नूतनानां नगराणाम् उदयः जायमानः आसीत् । ग्राम्यजीवनशैल्याम् अपि परिवर्तनं जायमानम् आसीत् (दशमाध्यायं पश्यतु) । अनेके विचारकाः एतानि परिवर्तनानि अवगन्तुं प्रयासं कुर्वन्तः आसन्। ते जीवनस्य वास्तविकम् अर्थम् अपि अवगन्तुम् इच्छन्तः आसन्।

बुद्धः क्षत्रियः आसीत् तथा च शाक्यनामकेन लघुगणेन सम्बद्धः आसीत् । यौवनावस्थायाम् एव सः तत्त्वज्ञानस्य अन्वेषणाय गार्हस्थ्यसुखानि त्यक्तवान्। सः अनेकानि वर्षाणि यावत् भ्रमणं कृतवान् तथा च अन्यैः विचारकैः सह मिलित्वा चर्चाम् अकरोत्। अन्ततः ज्ञानप्राप्तये सः स्वयमेव मार्गान्वेषणस्य निश्चयम् अकरोत्। एतदर्थं सः बोधगयायां (बिहारे) कस्यचित् अश्वत्थवृक्षस्य अधः बहूनि दिनानि यावत् तपः अकरोत्। अन्ततः सः ज्ञानम् अलभत। तत्पश्चात् सः बुद्धरूपेण ख्यातिं प्राप्नोत्। इतः सः वाराणस्याः निकटस्थं सारनाथं गतवान्, तत्र च प्रथमवारं जनेभ्यः उपदिष्टवान् सः कुशीनारायां मृत्योः प्राक् अवशिष्टं जीवनं पदातियात्रां कुर्वन् जनान् शिक्षयन् च अयापयत्। बुद्धः अशिक्षयत् यत् एतत् जीवनं कष्टयुतम् दुःखपूर्णं च अस्ति। अस्माकं दुःखम् इच्छानां लालसानां च कारणात् भवति याः सर्वदा पूर्तिं न गन्तुम् अर्हन्ति।

कदाचित् वयं यद् इच्छामः तत् प्राप्य अपि सन्तुष्टाः न भवामः, आधिक्येन इतोऽपि वस्तूनि प्राप्तुम् इच्छामः। बुद्धः एतस्याः लिप्सायाः कृते तृष्णा इति शब्दस्य प्रयोगम् अकरोत्। बुद्धः उपदिष्टवान् यत् आत्मसंयमस्य आचरणेन वयम् एतादृश्याः लालसायाः मुक्तिं प्राप्तुं शक्नुमः।
सः उपदिष्टवान् यत् जनाः दयालवः भवेयुः। मनुष्यैः सह एव पशुजीवनस्य अपि आदरं कुर्युः। सः मन्यते स्म यत् अस्माकं कर्मणां परिणामाः कामं ते समीचीनाः अथवा असमीचीनाः भवेयुः। अस्माकं वर्तमानजीवनेन सह अनन्तरजीवनम् अपि प्रभावयन्ति। बुद्धः स्वोपदेशान् जनसामान्याय प्राकृतभाषया अयच्छत्। एतस्मात् कारणात् सामान्यजनाः अपि तस्य उपदेशान् अवगन्तुम् अशक्नुवन्।.

वेदानां रचनायाः कृते कस्याः भाषयाः प्रयोगः अभवत्?

बुद्धः अवदत् यत् जनाः काम् अपि शिक्षाम् एतस्मात् कारणात् एव न स्वीकुर्युः यत् इयं शिक्षा तस्य उपदेशः इति अस्ति अपि तु ते इमां शिक्षां स्वविवेकस्य आधारेण स्वीकुर्युः। आगच्छतु पश्यामः यत् सः एवं कथम् अकरोत्।

**सारनाथस्तूपः**
एतद् भवनं स्तूपनाम्ना ज्ञायते। बुद्धः अत्र एव प्रथमवारम् अत्र एव जनेभ्यः उपदिष्टवान् आसीत्। एतस्याः घटनायाः स्मृतौ एव स्तूपस्य निर्माणः कृतः आसीत्। द्वादशाध्याये भवती एतेषां स्तूपानां (बौद्धचैत्यानाम्) विषये इतोऽपि विस्तरेण पठिष्यति।



### किसागोतम्याः कथा

इयं बुद्धस्य विषये काचित् प्रसिद्धा कथा अस्ति। एकदा किसागोतमीनामिकायाः स्त्रियाः पुत्रः अम्रियत । सा एतया घटनया तावती दुःखिनी जाता यत् सा स्वशिशुं क्रोडे निधाय नगरस्य राजमार्गेषु भ्रमन्ती जनान् प्रार्थयितुम् आरभत यत् कश्चित् तस्याः पुत्रं पुनर्जीवितं कुर्यात् । कश्चित् सज्जनः तां बुद्धस्य समीपं अनयत् ।

बुद्धः अवदत् "मह्यं मुष्टिमात्रं सर्षपबीजानि आनीय ददातु, अहं भवत्याः पुत्रं जीवितं करिष्यामि" । किसागोतमी अतीव प्रसन्ना अभवत्। परन्तु यदा सा बीजानि आनेतुम् उद्यता अभवत् तदा बुद्धः ताम् वारयित्वा अवदत् "एतानि बीजानि तादृशात् गृहात् याचित्वा आनयतु यत्र अद्यावधि कस्यापि मृत्युः न जाता स्यात्" ।

किसागोतमी एकस्मात् गृहात् अपरं गृहं प्रति अगच्छत् परन्तु यत्र यत्र सा अगच्छत् तत्र यत् प्रत्येकस्मिन् गृहे पितुः, मातुः, भगिन्याः, पत्युः, भ्रातुः, शिशोः, पितृव्यस्य, पितृव्यायाः, पितामहस्य पितामह्याः च इत्यस्य कस्यचित् मरणं जातम् एव आसीत् ।

बुद्धः दुःखग्रस्तां मातरं किं शिक्षयितुं प्रयासं करोति स्म ?

### उपनिषद्

यस्मिन् काले बुद्धः उपदिश्यमानः आसीत् तस्मिन् काले एव अथवा ततः किञ्चित्कालपूर्वम् एव केचन अन्ये चिन्तकाः अपि जटिलप्रश्नानाम् उत्तराणि अन्वेष्टुं प्रयतमानाः आसन्। तेषु केचन मृत्योः अनन्तरस्य जीवनस्य विषये जिज्ञासवः आसन् अपरञ्च अन्ये केचन यज्ञानाम् उपयोगितां ज्ञातुम् उत्सुकाः आसन् । एतेषु आधिकांशचिन्तकानां मतम् आसीत् यत् अस्मिन् जगति किञ्चित् एतादृशं निश्चयेन यः स्थायी अस्ति अपि च मृत्योः पश्चात् अपि अवशिष्यते। ते एतस्य वर्णनम् आत्मा एवञ्च ब्रह्म अथवा सार्वभौम-आत्मा इत्यनेन रूपेण कृतवन्तः। ते अन्ततः मन्यन्ते स्म यत् आत्मा ब्रह्म च एकमेव अस्ति।

एतादृशानाम् अनेकेषां विचाराणां सङ्कलनम् उपनिषत्सु अस्ति। उपनिषदः उत्तरवैदिकग्रन्थानां भागभूतग्रन्थाः सन्ति । उपनिषदः शाब्दिकः अर्थः अस्ति गुरोः समीपे उपवेशनम्। एतेषु ग्रन्थेषु गुरुशिष्ययोः मध्ये प्रवर्तमानानां चर्चाणां सङ्कलनम् अस्ति। प्रायः एते विचाराः सामान्य-वार्तालापस्य रूपेण प्रस्तुताः सन्ति।

एतासु चर्चासु भागग्रहीतारः अधिकांशतः ब्राह्मणाः राजानः च भवन्ति स्म। कुत्रचित् गार्गीसदृशीनां स्त्रीविचारकाणाम् अपि उल्लेखः लभ्यते। विद्वत्तायां प्रसिद्धा गार्गी राजसभासु जायमानेषु वादेषु भागं गृह्णाति स्म । निर्धनाः एतादृशेषु वादेषु विरलतया एव भागं गृह्णन्ति स्म । एतादृशः कश्चित् प्रसिद्धापवादः सत्यकामजाबालस्य अस्ति । सत्यकामजाबालस्य नाम तस्य दासीमातुः नाम्ना ख्यातम् । सत्यकामस्य मनसि सत्यं ज्ञातुं तीव्रजिज्ञासा प्रादुर्भूता । गौतमनामकः कश्चित् ब्राह्मणः तं स्वविद्यार्थिनः रूपेण अगृह्णात् अपि च सः तात्कालिकेषु

### बुद्धिमान् भिक्षुकः

अयं वार्तालापः छान्दोग्योपनिषन्नामक-प्रसिद्धोपनिषदः कस्याश्चित् कथायाः उपरि आधारितः अस्ति । शौनकः अभिप्रतारिणः च द्वौ ऋषी सार्वभौमात्मनः उपासनां कुरुतः स्म । एकदा यथा तौ भोक्तुम् काले भोक्तुम् उपाविशताम् कश्चित् भिक्षुकः तत्र आगच्छत् भोजनं च अयाचत ।

शौनकः अवदत् "आवां भवते किमपि न दातुं शक्नुवः" ।

भिक्षुकः पृष्टवान् "विद्वज्जनौ भवन्तौ कम् उपासाते "?

अभिप्रतारिणः उदतरत् "सार्वभौमात्मनः उपासनां करोमि" ।

"अहो! एतस्य अभिप्रायः अयम् अस्ति यत् सार्वभौमात्मा सम्पूर्णे विश्वे विराजते इति भवान् जानाति" ।

ऋषी अवदताम् यत् "आम्, आम्, आवाम् एतद् जानीवः" ।

भिक्षुकः पुनः अपृच्छत् "यदि अयं सार्वभौमात्मा सम्पूर्णविश्वे विद्यमानः अस्ति तर्हि अयं मम अन्तः अपि विद्यमानः अस्ति । अहं कः अस्मि ? अहम् एतस्य विश्वस्य कश्चित् भागः एव अस्मि" ।

"युवब्राह्मण! भवान् सत्यं ब्रवीति" ।

"हे ऋषी! अतः मह्यं भोजनम् अदत्त्वा भवन्तौ तस्मै सार्वभौमात्मने भोजनदानस्य निषेधं कुरुतः" ।

भिक्षुकस्य वार्तायाः सत्यतां ज्ञात्वा ऋषी तस्मै भोजनम् अदत्ताम् ।

भिक्षुकः भोजनं प्राप्तुं ऋषी कथं सहमतौ कृतवान् ?

सर्वाधिकप्रसिद्ध-विचारकेषु कश्चित् महान् विचारकः अभवत् । उपनिषदां अनेकेषां विचाराणां विकासः अनन्तरकाले प्रसिद्धविचारकेण शङ्कराचार्येण कृतः येषां विषये भवती सप्तमकक्षायां पठिष्यति ।

### व्याकरणविद् पाणिनिः

एतस्मिन् युगे अन्ये विद्वांसः अपि अनुसन्धानं कुर्वन्तः आसन् । तेषु प्रसिद्धविद्वत्सु पाणिनिः संस्कृतभाषायाः व्याकरणम् अरचयत् । सः स्वरान् व्यञ्जनानि च कस्मिंश्चित् विशिष्टे क्रमे स्थापयित्वा तेषाम् आधारेण सूत्राणि अरचयत् । एतानि सूत्राणि बीजगणितस्य सूत्रैः सह बहुसाम्यतां भजन्ते । एतेषां प्रयोगं कृत्वा सः संस्कृतभाषायां प्रयुक्तनियमान् लघुसूत्रेषु अलिखत् एते नियमाः प्रायः उपचतुःसहस्रम् आसन् ।

## जैनधर्मः

वर्धमानमहावीरः एतस्मिन् एव युगे अर्थात् प्रायः २५००वर्षेभ्यः पूर्वं जैनधर्मस्य चतुर्विंशतितमः अन्तिमतीर्थङ्करः च निजविचाराणां प्रसारम् अकरोत् । सः वज्जिसङ्घस्य लिच्छविकुलस्य कश्चित् क्षत्रियः राजकुमारः आसीत् । वज्जि-सङ्घस्य विषये भवन्तः षष्ठाध्याये अपठन् । ३०वर्षीयः सः गृहम् अत्यजत् । सः वने वासं कर्तुम् आरभत । सः द्वादशवर्षाणि यावत् एकाकी सन् जीवनम् अयापयत् । तदनन्तरं सः ज्ञानं प्राप्नोत् ।

वर्धमानमहावीरस्य शिक्षा सरला आसीत् । सत्यस्य जिज्ञासुः प्रत्येकं स्त्री अथवा पुरुषः स्वकीयं गृहं त्यजेत् । तादृशः सत्यजिज्ञासुः अहिंसायाः नियमान् दृढतया पालयेत् अर्थात् कस्यापि जीवस्य कृते कष्टं न दद्यात् । जीवस्य हत्यां न कुर्यात् । महावीरस्य कथनम् आसीत् यत् "सर्वे प्राणिनः जीवितुम् इच्छन्ति । सर्वेभ्यः जीवनं प्रियम् अस्ति" । महावीरः स्वकीयां शिक्षां प्राकृतभाषया अददात् । यस्मात् कारणात् साधारणजनाः एवञ्च तस्य अनुयायिनः अपि तस्य शिक्षाम् अवगन्तुं समर्थाः अभवन् । देशस्य विभिन्नेषु भागेषु प्राकृतभाषायाः विभिन्नानि रूपाणि प्रचलितानि आसन् । तस्याः प्राकृतभाषायाः क्षेत्रविशेषे प्रचलनस्य आधारेण एव विभिन्नानि नामानि आसन् यथा मगधे उच्यमाना प्राकृतभाषा मागधी इति उच्यते स्म ।

**जैनः**

जैन-शब्दः 'जिन'शब्दात् निष्पन्नः अस्ति, यस्य अर्थः अस्ति 'विजेता' ।

महावीरस्य कृते 'जिन'शब्दस्य प्रयोगः किमर्थम् अभवत्?

जैननाम्ना ख्यातस्य महावीरस्य अनुयायिभिः भोजनार्थं भिक्षाटनं कृत्वा सरलं जीवनं यापनीयं भवति स्म । तैः अनुयायिभिः सर्वथा सत्यमार्गपथिकैः भवितव्यम् आसीत् । तेषां कृते अस्तेयस्य दृढनिर्देशः आसीत् । ब्रह्मचर्यं पालनीयं भवति स्म । पुरुषैः वस्त्रसहितं सर्वं त्यक्तव्यं भवति स्म ।

अधिकांशजनानां कृते एतादृशानां दृढनियमानां पालनं बहुकठिनम् आसीत् । पुनरपि सहस्राधिकाः जनाः एतां नूतनां जीवनशैलीम् अवगन्तुं शिक्षितुं च स्वगृहाणि त्यक्तवन्तः । बहवः जनाः स्वगृहेषु एव अतिष्ठन् तथा च भिक्षुक-भिक्षुकीणां कृते भोजनं प्रदाय तेषां साहाय्यम् अकुर्वन् ।

मुख्यतः व्यापारिणः जैनधर्मस्य समर्थनम् अकुर्वन् । कृषकाणां कृते एतेषां नियमानां पालनम् अत्यन्तं कठिनम् आसीत् । यतो हि तैः कृषकैः सस्यस्य रक्षार्थं कीटाः मारणीयाः भवन्ति स्म । जैनधर्मः अनन्तरेषु शताब्देषु उत्तरभारतस्य अनेकेषु भागेषु तथा च गुर्जरे तमिलनाडौ एवञ्च कर्णाटके अपि प्रासरत् । महावीरस्य तस्य च अनुयायिनाम् उपदेशाः बह्वीः शताब्दीः यावत् मौखिकरूपेण एव आसन् । वर्तमानकाले उपलब्धस्य जैनधर्मस्य शिक्षाः प्रायः १५००वर्षेभ्यः पूर्वं गुर्जरे वल्लभीनामके स्थाने लिखिताः आसन् । (सप्तमे मानचित्रे ११३तमे पृष्ठे पश्यन्तु) ।

## सङ्घः

महावीरस्य बुद्धस्य च द्वयोः एव मतम् आसीत् यत् गृहस्य त्यागात् एव तात्त्विकस्य ज्ञानस्य प्राप्तिः भवितुं शक्नोति । सः एतादृशानां जनानां कृते सङ्घनामकं सङ्घटनं कृतवान् । यत्र गृहत्यागिनः जनाः एकस्मिन् स्थाने वसितुं शक्नुयुः । विनयपिटकनामके ग्रन्थे सङ्घवासिनां बौद्धभिक्षुकाणां कृते निर्मिताः नियमाः सन्ति । वयं विनयपिटकेन अवगच्छामः यत् सङ्घे पुरुषाणां स्त्रीणां च वासव्यवस्था पृथक्-पृथक् आसीत् । सर्वे जनाः सङ्घे प्रवेष्टुं शक्नुवन्ति स्म । यद्यपि सङ्घे प्रवेशाय बालैः स्वपितृभ्यः, दासैः स्वस्वामिभ्यः, राजपुरुषैः राजभ्यः आज्ञा

स्वीकर्तव्या भवति स्म । अधमर्णैः धनिकेभ्यः अनुमतिः ग्रहीतव्या भवति स्म । स्त्रिया सङ्घप्रवेशाय स्वपत्युः अनुमतिः स्वीकर्तव्या भवति स्म ।

सङ्घे प्रवेष्टृभिः स्त्रीपुरुषैः बहुसरलं जीवनं यापनीयं भवति स्म । ते स्वस्य अधिकांश-समयं ध्याने साधनायां च यापयन्ति स्म । साधकाः कस्मिंश्चित् निश्चिते काले दिने नगराणि ग्रामान् च गत्वा भिक्षां याचन्ते स्म । एतस्मात् कारणात् एव ताः भिक्षु-भिक्षुक्यः (साधु-भिक्षुकयोः कृते प्राकृतशब्दः भिक्खु भिक्खुणी च इति आसीत्) इति शब्देन सम्बोध्यन्ते स्म । ते सामान्यजनेभ्यः उपदिशन्ति स्म । सममेव परस्परं साहाय्यं अपि कुर्वन्ति स्म । ते पारस्परिके कस्मिन्नपि कलहे जाते सति तस्य निदानाय प्रायः उपवेशनानि कुर्वन्ति स्म ।

सङ्घे प्रवेशग्रहीतृषु ब्राह्मणाः क्षत्रियाः व्यापारिणः श्रमिकाः नापिताः गणिकाः दासाः च सम्मिलिताः आसन् । एतेषु बहवः जनाः बुद्धस्य शिक्षाणां विषये लिखितवन्तः तथा च केचन जनाः सङ्घे स्वजीवनस्य विषये सुन्दरकवितानां रचनाः कृतवन्तः ।

गताध्याये वर्णितसङ्घस्य अस्मिन् अध्याये वर्णितस्य सङ्घस्य च मध्ये भिन्नताद्वयं सूचयतु । किम् एतयोः काचित् समानता दृश्यते ?

### विहारः

जैनबौद्धभिक्षवः आवर्षम् एकस्मात् स्थानात् अन्यत् स्थानं प्रति भ्रमित्वा उपदिशन्ति स्म । केवलं वर्षर्तौ यदा यात्रा कठिना भवति स्म तदा ते एकस्मिन् स्थाने एव निवसन्ति स्म । एतादृशे काले ते निजानुयायिभिः उद्यानेषु निर्मापितेषु कुटीरेषु अथवा पर्वतीयक्षेत्राणां प्राकृतिकगुहासु निवसन्ति स्म ।

कालक्रमेण भिक्षुकी-भिक्षुकाः तेषां समर्थकाः च अधिक-स्थायि-शरण-स्थलानाम् आवश्यकताः अनुभूतवन्तः । तदा अनेकानि शरणस्थलानि निर्मितानि यानि विहाराः इति उक्ताः । आरम्भे विहाराः काष्ठमयाः निर्मिताः आसन् पश्चात् एतेषां निर्माणे इष्टकानां प्रयोगः अपि प्रारब्धः । पश्चिमभारते विशेषतया केचन विहाराः पर्वतान् खनित्वा निर्मिताः ।

उपत्यकां खनित्वा निर्मिता काचित् गुहा । इयं कार्ले (वर्तमान-महाराष्ट्रे) स्थिता काचित् गुहा अस्ति । भिक्षुक्यः भिक्षुकाः च एतेषु शरणस्थलेषु उषित्वा ध्यानं कुर्वन्ति स्म ।



**केनचित् बौद्धग्रन्थेन ज्ञायते-**

यथा महासागरेषु प्राप्तासु नदीनां पृथक्-पृथक् सत्ता न ज्ञायते अर्थात् सा सत्ता समाप्ता भवति तथैव बुद्धस्य अनुयायिनः यदा भिक्षुकश्रेणीषु प्रविशन्ति तदा ते स्वस्य वर्णम् अर्थात् जातिं श्रेणीं कुटुम्बं च सर्वं त्यजन्ति ।

प्रायः कैश्चित् धनि-व्यापारि-नृप-भूस्वामिभिः प्रदत्तभूमौ एव विहारस्य निर्माणं भवति स्म । स्थानीयजनाः भिक्षुकी-भिक्षुकेभ्यः भोजनं वस्त्राणि ओषधानि च आनयन्ति स्म । तदर्थं तेभ्यः जनेभ्यः भिक्षुकाः उपदेशान् शिक्षाः वा प्रतियच्छन्ति स्म । अग्रिमेषु शताब्देषु बौद्धधर्मः न केवलम् उपमहाद्वीपस्य विभिन्नभागेषु एव अपितु बाह्यक्षेत्रेषु अपि प्रसृतः । दशमाध्याये भवती एतस्मिन् विषये इतोऽपि पठिष्यति ।

### आश्रम-व्यवस्था

जैन-बौद्ध-धर्मौ यस्मिन् काले लोकप्रियौ जायमानौ आस्ताम् प्रायः तस्मिन् काले एव ब्राह्मणाः आश्रमव्यवस्थायाः विकासम् अकुर्वन् ।

अत्र 'आश्रमः' इति शब्दस्य तात्पर्यं जनैः वासाय ध्यानाय वा उपयुज्यमानस्य स्थानेन नास्ति अपितु अस्य तात्पर्यं जीवनस्य कश्चन कालखण्डः अर्थात् भागः इति अस्ति ।

ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यास-नामकानां चतुर्णाम् आश्रमाणां व्यवस्था कृता ।

ब्रह्मचर्यस्य अन्तर्गतं ब्राह्मण-क्षत्रिय-वैश्येभ्यः इयम् अपेक्षा क्रियते स्म यत् जीवनस्य अस्मिन् काले ते सरलं जीवनं यापयित्वा वेदानाम् अध्ययनं करिष्यन्ति ।

तैः गृहस्थाश्रमस्य अन्तर्गतं पाणिग्रहणं कृत्वा गृहस्थरूपेण वसितव्यं भवति स्म । तैः वानप्रस्थस्य अन्तर्गतं वने उषित्वा साधना करणीया भवति स्म । अन्ततः तैः सर्वं त्यक्त्वा सन्यासिभिः भवितव्यम् आसीत् ।

आश्रमव्यवस्था जनान् स्वजीवनस्य कञ्चित् कालं ध्याने नियोजयितुं प्रेरयति स्म ।

प्रायः वेदम् अध्येतुं स्त्रियः अधिकारिण्यः न आसन् । परन्तु ताभिः निजपतिभिः आचरितानाम् आश्रमाणाम् एव अनुसरणं करणीयं भवति स्म ।

सङ्घजीवनतः आश्रमाणाम् इयं व्यवस्था कथं भिन्ना आसीत् ? अत्र केषां वर्णानाम् उल्लेखः अभवत् ? किं सर्वे चत्वारः वर्णाः आश्रमव्यवस्थाम् आचरितुम् अधिकारिणः आसन् ?

### अन्यत्र

मानचित्रे ईरानम् अन्विष्यतु । जरथुस्त्रः कश्चित् ईरानी-पैगम्बरः आसीत् । तस्य शिक्षाणां सङ्कलनं जेन्द-अवेस्ता नामक-ग्रन्थे उपलभ्यते । जेन्द-अवेस्तायाः भाषा अपि च अस्मिन् ग्रन्थे वर्णित-रीतयः वेदानां भाषया रीतिभिः च सह साम्यतां भजन्ते । जरथुस्त्रस्य मूल-शिक्षायाः सूत्रम् अस्ति - 'सद्-विचारः, सद्वचनं सद्-कार्यं चेति ।

हे ईश्वर ! अस्मभ्यम् बलं सत्य-प्रधानतां सद्विचारं च प्रददातु, येषां माध्यमेन वयं शान्तिं प्राप्तुं शक्नुयाम ।

सहस्रं वर्षाणि यावत् जरथुस्त्रवादः ईरानस्य कश्चित् प्रमुखधर्मः आसीत् । अनन्तरकाले केचन जरथुस्त्रवादिनः ईरानतः आगत्य गुर्जर-महाराष्ट्रयोः तटवर्त्तिनगरेषु आगत्य उषितवन्तः । ते एव वर्तमानानां पारसिजनानां पूर्वजाः आसन् ।

## कल्पनां करोतु

भवती प्रायः २५००वर्षेभ्यः पूर्वतनस्य कस्यचित् उपदेशकस्य उपदेशं श्रोतुम् इच्छति । तत्र गन्तुं मातापित्रोः अनुमतिं स्वीकर्तुं तौ कथं सहमतौ करिष्यति तत् वर्णयतु ।

### आगच्छन्तु स्मरणं कुर्मः



१. बुद्धः जनेषु स्वविचारान् प्रसारयितुं केषु केषु विषयेषु बलाघातम् अकरोत् ?

२. शुद्धम् अशुद्धं च वाक्यं ज्ञापयतु ।

क) बुद्धः पशुबलेः कृते प्रोत्साहनम् अयच्छत् ।

ख) बुद्धद्वारा प्रथमः उपदेशः सारनाथे प्रदत्तः, अतः एतस्य स्थानस्य महत्त्वम् अधिकम् अस्ति ।

ग) बुद्धः अशिक्षयत् यत् अस्माकं जीवने कर्मणः कोऽपि प्रभावः न जायते ।

घ) बुद्धः बोधगयायां ज्ञानम् अलभत ।

ङ) उपनिषद्विचारकाणां मतम् आसीत् यत् आत्मा ब्रह्म च वास्तविकतायां एकैव स्तः ।

३. उपनिषदां विचारकाः केषां प्रश्नानाम् उत्तराणि दातुम् इच्छन्ति स्म ?

४. महावीरस्य प्रमुखाः शिक्षाः काः आसन् ?

**काश्चन महत्त्वपूर्णतिथयः**

- उपनिषदां विचारकौ जैनमहावीर-बुद्धौ (प्रायः २५००वर्षेभ्यः पूर्वम्)
- जैनग्रन्थानां लेखनं (प्रायः १५००वर्षेभ्यः पूर्वम्)

### आगच्छतु चर्चयामः



५. अनघायाः अम्बा किमर्थम् इच्छति स्म यत् तस्याः पुत्री बुद्धस्य कथया परिचिता स्यात् ? भवतां एतस्मिन् विषये किं कथनम् अस्ति ।

६. किं भवन्तः चिन्तयन्ति यत् दासेभ्यः सङ्घे प्रवेशः सरलः स्यात् तर्कसहितम् उत्तरं यच्छन्तु ।

### आगच्छतु कृत्वा पश्यामः



७. एतस्मिन् अध्याये उल्लिखितानां पञ्चानां विचाराणां प्रश्नानां च सूचीं निर्मातु । तेषु केषाञ्चित् त्रयाणां चयनं कृत्वा चर्चयतु यत् अद्य अपि ते किमर्थं महत्त्वपूर्णाः सन्ति ?

८. अद्य संसारस्य त्यागिनां स्त्रीपुरुषाणां विषये आधिक्येन ज्ञातुं प्रयासं करोतु । एते जनाः कुत्र निवसन्ति, कीदृशानि वस्त्राणि धरन्ति किं च खादन्ति ? एते संसारस्य त्यागं किमर्थं कुर्वन्ति ?

इति सप्तमोऽध्यायः